# Shri Shripadaraja Ashtakam 1

# શ્રીશ્રીપાદરાજાષ્ટકમ્ ૧

## Document Information

Text title : Shri Shripadaraja Ashtakam 1

File name : shrIpAdarAjAShTakam1.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : vijayIndrayati

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# શ્રીશ્રીપાદરાજાષ્ટકમ્ ૧

શ્રીમદ્વીરનૃસિંહનામનૃપતેર્ભૂદેવ હત્યા વ્યથાં
    દૂરીકૃત્ય તદર્પિતોજ્જ્વલમહાસિંહાસને સંસ્થિતઃ ।
શ્રીમત્પૂર્વકવાટનામકપુરે સર્વેષ્ટ સિદ્ધિપ્રદઃ
    શ્રીપાદયતીન્દ્રશેખરમણિઃ ભૂયાત્સનઃ શ્રેયસે ॥ ૧॥

ભેરી મઞ્જુળ કાહલી મુખ મહાનાનાવિધ પ્રોજ્વલ
    ધ્વાન્તધ્વાન નિરસ્તવાદિ નિચયઃ શ્રીપાદરાજોસ્તુ નઃ ।
સૌવર્ણામલ દણ્ડચામરસિતચ્છત્રોરુ હૈમોલ્લસત્
    યષ્ટિદ્વન્દ્વસુપઞ્ચવર્ણવસનો ભૂયાત્સ નઃ શ્રેયસે ॥ ૨॥

પાદત્રાણયુગં ક્વણત્સુચરણદ્વન્દ્વેન સંયોજયતત્
    દુશ્શાસ્ત્રં પદકઞ્જરક્ષણયુગે બન્દીકૃતં કૂજતી ।
ધીરાન્મોચયતેતિ બન્દિષુ પુરોગર્જત્સુ સિંહાસનં
    ગચ્છન્મૌક્તિક કઞ્ચુકોજ્જ્વલતનુર્ભૂયાત્સનઃ શ્રેયસે ॥ ૩॥

નાનાશાક સુભક્ષ્યપાયસઘૃતં પ્રાજ્યાન્નભુક્ત્યાજને
    નિન્દાં કુર્વતિ કાનનં ગતવતે યસ્મૈ દદૌ શ્રીપતિઃ ।
મૃષ્ટાન્નં સઘૃતં પયોદધિયુતં સોપસ્કરં કાનને
    ગોપીનાથપદાબ્જ સક્તસુમનાઃ ભૂયાત્સનઃ શ્રેયસે ॥ ૪॥

ચૈત્રેમાસિ કઠોરભાસ્કરકરૈસ્સન્તપ્તગાત્રાખિલ
    સ્વાન્તેવાસિભિરર્થિભિઃ સ્વતપસા નિર્માય રમ્યં સરઃ ।
સારામો યતિપુઙ્ગવઃ પરિજનાનપ્યાયયા માસયા-
    ચ્છાયતોય વિહીન કાનનતલેર્ભૂયાત્સનઃ શ્રેયસે ॥ ૫॥

ત્વં ચેન્માં જયસિદ્ધિચામરધુનીં ગચ્છાવિનોચેત્તદા
    સન્યસ્તોભવ પણ્ડિતેતિ સદસી ક્ષોણીપતે પત્રિકા ।
આલેખ્યપ્રિયશિષ્યવર્ય યતિના યત્યાશ્રમં વાદિનં
    જિત્વાદાપિતવાંશ્ચતસ્ય સુમતીર્ભૂયાત્સનઃ શ્રેયસે ॥ ૬॥

વૈરાગ્યામલભક્તિનિર્મલ મહાજ્ઞાનાદિ ભાગ્યોજ્વલઃ
    શ્રીમત્ શ્રીપતિરઙ્ગવિટ્ઠલ પદામ્ભોજ પ્રભાવં હૃદી ।
સ્મારંસ્મારમહર્નિશં નિજમહાનન્દાબ્ધિમગ્નો ગુરુઃ
    લોકાનન્દકરોરુ રમ્યમહિમા ભૂયાત્સનઃ શ્રેયસે ॥ ૭॥

યદ્બૃન્દાવન સેવયા ભુવિ જનઃ પ્રાપ્નોતિ સૌખ્યં મહત્
    યદ્બૃન્દાવન મૃત્તિકાપિ નિટિલે ભક્ત્યા ધૃતા સેવિતા ।
ભૂતોચ્ચાટનકારિણી ક્ષયમહાપસ્મારગુલ્માદિકા
    નેક વ્યાધિનિવારણૈકકરુણિર્ભૂયાત્સનઃ શ્રેયસે ॥ ૮॥

ઇતિ શ્રીવિજયીન્દ્રયતિવિરચિતં શ્રીપાદરાજષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishnananda Achar

---

*Shri Shripadaraja Ashtakam 1*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*